শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

# ॥শ্রীৱিষ্ণুশতনামস্তোত্রম্ ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using Bengali for TEX.

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

# ॥ শ্রীৱিষ্ণুশতনামস্তোত্রম্ ॥

ৱাসুদেৱং হৃষীকেশং ৱামনং জলশাযিনম্।
জনার্দনং হরিং কৃষ্ণং শ্রীৱক্ষং গরুডধ্বজম্॥ ১ ॥

ৱারাহং পুণ্ডরীকাক্ষং নৃসিংহং নরকান্তকম্।
অৱ্যক্তং শাশ্বতং ৱিষ্ণুমনন্তমজমৱ্যযম্॥ ২ ॥

নারাযণং গদাধ্যক্ষং গোৱিন্দং কীর্তিভাজনম্।
গোৱর্ধনোদ্ধরং দেৱং ভূধরং ভুৱনেশ্বরম্॥ ৩ ॥

ৱেত্তারং যজ্ঞপুরুষং যজ্ঞেশং যজ্ঞৱাহকম্।
চক্রপাণিং গদাপাণিং শঙ্খপাণিং নরোত্তমম্॥ ৪ ॥

ৱৈকুণ্ঠং দুষ্টদমনং ভূগর্ভং পীতৱাসসম্।
ত্রিৱিক্রমং ত্রিকালজ্ঞং ত্রিমূর্তিং নন্দিকেশ্বরম্॥ ৫ ॥

রামং রামং হযগ্রীৱং ভীমং রৌদ্রং ভৱোদ্ভৱম্।
শ্রীপতিং শ্রীধরং শ্রীশং মঙ্গলং মঙ্গলাযুধম্॥ ৬ ॥

দামোদরং দমোপেতং কেশৱং কেশিসূদনম্।
ৱরেণ্যং ৱরদং ৱিষ্ণুমানন্দং ৱসুদেৱজম্॥ ৭ ॥

হিরণ্যরেতসং দীপ্তং পুরাণং পুরুষোত্তমম্।
সকলং নিষ্কলং শুদ্ধং নির্গুণং গুণশাশ্বতম্॥ ৮ ॥

হিরণ্যতনুসঙ্কাশং সূর্যাযুতসমপ্রভম্।
মেঘশ্যামং চতুর্বাহুং কুশলং কমলেক্ষণম্॥ ৯ ॥

জ্যোতীরূপমরূপং চ স্বরূপং রূপসংস্থিতম্।
সর্ৱজ্ঞং সর্ৱরূপস্থং সর্ৱেশং সর্ৱতোমুখম্॥ ১০ ॥

জ্ঞানং কূটস্থমচলং জ্ঞানদং পরমং প্রভুম্।
যোগীশং যোগনিষ্ণাতং যোগিনং যোগরূপিণম্॥ ১১ ॥

ঈশ্বরং সর্ৱভূতানাং ৱন্দে ভূতমযং প্ৰভুম্।
ইতি নামশতং দিৱ্যং ৱৈষ্ণৱং খলু পাপহম্॥ ১২ ॥

ৱ্যাসেন কথিতং পূৰ্ৱং সৰ্ৱপাপপ্ৰণাশনম্।
যঃ পঠেত্ প্ৰাতরুত্থায স ভৱেদ্বৈষ্ণৱো নরঃ॥ ১৩ ॥

সৰ্ৱপাপৱিশুদ্ধাত্মা ৱিষ্ণুসাযুজ্যমাপ্নুযাত্।
চান্দ্ৰাযণসহস্ৰাণি কন্যাদানশতানি চ॥ ১৪ ॥

গৱাং লক্ষসহস্ৰাণি মুক্তিভাগী ভৱেন্নরঃ।
অশ্বমেধাযুতং পুণ্যং ফলং প্ৰাপ্নোতি মানৱঃ॥ ১৫ ॥

॥ ইতি শ্ৰীৱিষ্ণুশতনামস্তোত্ৰং সংপূৰ্ণম্ ॥